# सुन्दरकाण्ड चतुर्थ सर्गः (४) - ॥ लङ्कापुरीपरिभ्रमणम्॥

स निर्जित्य पुरीं श्रेष्ठां लङ्कां तां कामरूपिणीम् ।
विक्रमेण महातेजा हनूमान्  कपि सत्तमः ॥ १ ॥

अद्वारेण महाबाहुः प्राकार मभिपुप्लुवे ।
निशि लङ्कां महासत्वो विवेश कपि कुञ्जरः ॥ २ ॥

प्रविश्य नगरीं लङ्कां कपिराज हितङ्करः ।
चक्रेऽथ पादं सव्यं च शत्रूणां स तु मूर्धनि ॥ ३ ॥

प्रविष्टः सत्त्वसम्पन्नो निशायां मारुतात्मजः ।
स महापथमास्थाय मुक्तापुष्प विराजितम् ॥ ४ ॥

ततस्तु तां पुरीं रम्याम् लङ्कां अभिययौ कपिः ॥ ५
हसितोत्कृष्ट निनदैस्तूर्य घोष पुरःसरैः । ॥

वज्राङ्कुश निकाशैश्च वज्र जाल विभूषितैः ।
गृहमुख्यैः पुरी रम्या बभासे द्यौरिवाम्बुदैः ॥ ६ ॥

प्रजज्वाल तदा लङ्का रक्षोगणगृहैः शुभैः ।
सिताभ्र सदृशैश्चित्रैः पद्म स्वस्तिक संस्थितैः ॥ ७ ॥

वर्धमान गृहैश्चापि सर्वतः सुविभूषिता ।
तां चित्रमाल्याभरणां कपिराज हितङ्करः ॥ ८ ॥

राघवार्थं चरन् श्रीमान् ददर्श च ननन्द च ।
भवनाद्भवनं गच्छन् ददर्श पवनात्मजः ॥ ९ ॥

विविधाकृति रूपाणि भवनानि ततस्ततः ।
शुश्राव मधुरं गीतं त्रिस्थान स्वर भूषितम् ॥ १० ॥

स्त्रीणां मदसमृद्धानां दिवि चाप्सरसामिव ।
शुश्राव काञ्ची निनदं नूपुराणां च निःस्वनम् ॥ ११ ॥

सोपान निनदांश्चैव भवनेषु महात्मनाम् ।
आस्फोटित निनादांश्च क्ष्वेलितांश्च ततस्ततः ॥ १२ ॥

शुश्राव जपतां तत्र मन्त्रान्रक्षोगृहेषु वै ।
स्वाध्याय निरतांश्चैव यातु धानान्ददर्श सः ॥ १३ ॥

रावणस्तव सम्युक्तान गर्जतो राक्षसानपि ।
राजमार्गं समावृत्य स्थितं रक्षोबलं महत् ॥ १४ ॥

ददर्श मध्यमे गुल्मे रावणस्य चरान् बहून् ।
दीक्षितान् जटिलान्मुण्डान् गोऽजिनाम्बर वाससः ॥ १५ ॥

दर्भमुष्टिप्रहरणान् अग्निकुण्डायुधांस्तथा ।
कूटमुद्गर पाणींश्च दण्डायुध धरानपि ॥ १६ ॥

एकाक्षानेक कर्णांश्च लम्बोदर पयोधरान् ।
करालान् भग्न वक्त्रांश्च विकटान् वामनांस्तथा ॥ १७ ॥

धन्विनः खड्गिनश्चैव शतघ्नीमुसलायुधान् ।
परिघोत्तम हस्तांश्च विचित्र कवचोज्ज्वलान् ॥ १८ ॥

नातिस्थूलान्नातिकृशान्नातिदीर्घातिह्रस्वकान् ।
नातिगौरान् नातिकृष्णान् नातिकुब्जान्न वामनान् ॥ १९ ॥

विरूपान् बहुरूपांश्च सुरूपांश्च सुवर्चसः ।
ध्वजीन्पताकिनश्चैव ददर्श विविधायुधान् ॥ २० ॥

शक्ति वृक्षायुधांश्चैव पट्टशाशनिधारिणः ।
क्षेपणी पाश हस्तांश्च ददर्श स महाकपिः ॥ २१ ॥

स्रग्विणस्त्वनु लिप्तांश्च वराभरण भूषितान् ।
नाना वेष समायुक्तान्यथा स्वैर गतान्बहून् ॥ २२ ॥

तीक्ष्ण शूलधरांश्चैव वज्रिणश्च महाबलान् ।
शत साहस्र मव्यग्रमारक्षं मध्यमं कपिः ॥ २३ ॥

रक्षोधिपति निर्दिष्टं ददर्शान्तः पुराग्रतः ।
स तदा तद्गृहं दृष्ट्वा महाहाटक तोरणम् ॥ २४ ॥

राक्षसेन्द्रस्य विख्यात मद्रिमूर्ध्नि प्रतिष्ठितम् ।
पुण्डरीकावतंसाभिः परिखाभिः अलङ्कृतम् ॥ २५ ॥

प्राकारा वृत मत्यन्तं ददर्श स महाकपिः ।
त्रिविष्टप निभं दिव्यं दिव्य नाद विनादितम् ॥ २६ ॥

वाजिहेषित सङ्घुष्टं नादितं भूषणैस्तथा ।
रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः ॥ २७ ॥

वारणैश्च चतुर्दन्तैः श्वेताभ्र निचयोपमैः ।
भूषितं रुचिरद्वारं मत्तैश्च मृग पक्षिभिः ॥ २८ ॥

रक्षितं सु महावीर्यैर्यातुधानैः सहस्रशः ।
राक्षसाधि पतेर्गुप्त माविवेश महाकपिः ॥ २९ ॥

सहेम जाम्बूनद चक्रवालं
महार्ह मुक्ता मणि भूषितान्तम् ।

परार्थ्यकाला गरुचन्दनाक्तं
स रावणान्तः पुरमाविवेश ॥ ३० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्थः सर्गः

॥४॥